ARYAVART SHODH VIKAS PATRIKA
RNI TITLED NO. UPBBIL04292
RNI REG. NO. UPBBIL/2014/66218 PP. NO.- 61-63
ISSN NO.-2347-2944
Vol.-8, No.-II, Issues-IX YEAR- Dec-2017

# व्याकरणाध्ययनस्य प्रयोजनम्

## (शोध–पत्रम्)

**अवधेश कुमार मिश्र**

**असिस्टेन्ट प्रोफेसर–संस्कृत विभाग, भगवन्त पाण्डेय पी0जी0 कालेज, बोदरवार–कुशीनगर (उ0प्र0), भारत**

*शब्दानुशासनकृतेऽन्वितसूत्रकारं, सूत्रानुपूरक सुवार्तिकशासितारं।*
*भाष्यं विधाय बहुकिर्तिगतं स्मरामि, कात्यायनं किल् पतञजलिपाणिनिं च।।*

*नामरूपात्मकस्य अस्य जगतः स्थितिः शब्दाधीनैवेति नास्ति शशप□कलोऽपि।*

आ मनुष्यात् आ च पक्षिणः सर्वेषां व्यवहारे शब्दस्य प्राधान्यम्प्रतिपदमभिलक्षितं भवति। अत एवोक्तंमहाकविदण्डिना–

इदमन्धन्तमः कृत्स्नं जायते भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते (काव्यादर्शः श्लोकः –1)

अत एव शब्दशास्त्रस्य व्याकरणस्य अध्ययनमावश्यकमिति भगवता पतञजलिना महाभाष्ये व्याकरणस्य पञच मुख्यानि प्रयोजनानि त्रयोदश गौणप्रयोजनानि च प्रतिपादितानि।

वेदानां रक्षकत्वाद् वेदार्थबोधने सहायकत्वात् प्रकृतिप्रत्ययोपदेशपुरःसर पदस्वरूपप्रतिपादकत्वादर्थ–निर्णयकृत्साधनेष्वन्यतमसाधनत्वेन प्रयुक्तत्वाद् व्याकरणं नाम वेदाड्.गं नितान्तमेव महनीयं श्रेष्ठं च अंगमड्.गेषु स्मृतम्।

परमत्र इदं विचारणीयं यद् ''व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेन इति व्याकरणम्'' वि+आड्.उपसर्गपूर्वकात् कृध ाातोः ''करणाधिकरणयोश्च'' इति सूत्रेण ल्युटि प्रत्ययेन व्याकरणशब्दो निष्पद्यते।

विदितचरमेव इदं सर्वेषां गीर्वाणभाषाऽध्ययनरसिकानां यद् व्याकरणशास्त्रं विद्वत्समाजे कीदृशं गौरवं भजतीति। सर्वेषां दर्शनानां काव्यनाटकादीनां तथा आयुर्वेदज्योतिषप्रभृतिशास्त्राणामपि सम्यग् ज्ञानार्थं व्याकरणशास्त्रज्ञानं नितान्तम् आवश्यकम्। तत्र स्वरूपनियमस्तावत् गौः एव साधुः गावी–गोणी–गोता–गोपोतलिका इत्येवमादयः असाधव एव। प्रयोगनियमस्तु तावत् साधूनेव शब्दान् प्रयुञजीत नासाधूनिति। तत्र व्याकरणविहितयोः अनयोः नियमयोरेकतरस्यापि संसारव्यवहारनियामकत्वाभावादनुपयोगित्वं व्याकरणशास्त्रस्य सुतरां सिद्धयति।

वेदानां रक्षार्थं व्याकरणमध्येयमिति। अत्र अयम्भावः–वेदः अवयवी, व्याकरणं तु तस्य मुखभूतो अवयवः। यथा मुखेन विना अवयवी शरीरं न सुरक्षितं भवति, तथैव व्याकरणं विना वेदस्य स्वरूपमपि न सुरक्षितं भवति। यतः वेदो ज्ञानकर्मकाण्डयोर्भेदात् काण्डद्वये विभक्तः, तत्र कर्मकाण्डे यागानाम् अनुष्ठेयत्वात् ऋते व्याकरणं यागस्य च अनुष्ठानं सम्भवं यथा तथा ज्ञानकाण्डे प्रतिपाद्यस्य आत्मनोऽपि सम्यग्यानं व्याकरणं विना असम्भवप्रायम्। अतः वेदार्थस्य बोधार्थं यागादीनाञच सम्यगनुष्ठानार्थं व्याकरणस्याध्ययनमाव यकम्।

मन्त्रो हीनः स्वरतो वर्णतो वा, मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति, यथेन्द्रशत्रुः स्वरतोऽपराधात्।। (पातञ्जलमहाभाष्यम्)

अस्मिन् मन्त्रे भगवता महाभाष्यकारेण शब्दासत्यं कतिविधं भवति इति प्रतिपाद्य तस्य किं दुष्फलमिति प्रतिपादितम्। यस्मिन् मन्त्रे यः स्वरः साधुः तमुपेक्ष्य अनवधानतया स्वरान्तरस्य प्रयोगोऽपि शब्दसत्यत्वमेव। यथा–

''इन्द्रशत्रुर्वर्धस्व'' इत्यत्र शुद्धमन्तोदात्तं स्वरं विहाय आद्युदात्तः स्वरः ऋत्विग्भिः प्रयुक्तः। एवञ्च मन्त्रे शब्दसत्यत्वसंश्लेषात् यजमानस्य वृत्रस्य एव वधो जातः। एवमेव यस्मिन् शब्दे यः वर्ण उच्चारयितव्यः तमुपेक्ष्य वर्णान्तरस्य उच्चारणमपि शब्दासत्यत्वमेव।

व्याकरणाभिज्ञस्य दृष्ट्यां ''जभार'' इत्येतत् क्रियापदं न शुद्धम्, स जहार इत्येतदेव शुद्धं मत्वा ''जभार'' इत्येतत्पदमुच्चार्य जहार इति प्रयोक्तुमुपक्रान्तो भविष्यति। कुफलं चैतदीपमिदं स्याद् वेदोऽनेकपरिवर्तिपदवान्। अयं हि महाननर्थे व्याकरणशून्यतया निपातितो भवेत्। तस्माद् व्याकरणशून्यतया निपातितो भवेत्। तस्माद् व्याकरणस्याध्ययनां नितरामपेक्ष्यते। व्याकरणाध्ययनेन विभक्तिविपरिणामस्य च बोधो जायते तस्माद् व्याकरणमवश्यमध्ययनीयमस्ति। न सर्वेर्लिड्.गैर्न च सर्वाभिर्विभक्तिभिर्वेदे मन्त्राः सन्ति निगदिताः। ते चावश्यं यज्ञगतेन यथायथं विपरिणमयितव्या भवन्ति। नावैयाकरणस्तान् यथायथं विपरिणमयितुं शक्नोति। तथा हि–''अग्नये त्वा जुष्टं निर्वपामि'' इत्येतदस्ति वेदवाक्यम्। इदं हि वाक्यमग्निदेवताकं वर्तते। निर्वापकाले अग्निदेवतामुद्दिश्य मन्त्रोऽयं पठितो भवति। परं यदा सूर्यदेवतां लक्ष्यीकृत्वय निर्वापः कृतो भवति, तदा सूर्याय त्वा जुष्टं निर्वपामि इत्येतेन विपरिणम्यैव पठनीयो भवति मन्त्र एषः। इयं हि विपरिणामं वैयाकरण एव यथायथं कर्तुं पारयति। ''ब्राह्मणेन निष्कारणो धर्मः शडड्.गो वेदोऽध्येयो ज्ञेय च'' इत्येतस्मादपि

अनुरूपी लेखक

हेतोर्व्याकरणस्याध्ययनं परमोपेक्षितं भवति वेदस्यशडड्.गत्वात्शट्स्वड्.गेषु च व्याकरणस्य प्रधानत्वात्।

शब्दशास्त्रमनधीत्य यः पुमान् वक्तुमिच्छति वचः सभान्तरे।
बद्धुमिच्छति वने मदोत्कटं हस्तिनं कमलनालतन्तुना।।

अत एवोच्यते– ''काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्'' वस्तुतः लोकोपकारकं यच्छास्त्रं तच्छास्त्रोपकारकं कणादं पारिणनीयञ्च शास्त्रम् वैशेषिकदर्शनं पाणिनीयव्याकरणञ्च। अत ऐहिकामुष्मिकाभ्युदयप्राप्तये परं पुरूषार्थमोक्षावाप्तये च व्याकरणं नूनमध्येयमिति सिद्धयति। व्याकरणाध्ययनस्योपयोगिता।

अथ गौणप्रयोजनम्– भगवता पतञजलिना कानि पुनः शब्दानुशासनस्य प्रयोजनानि इत्युक्त्वा त्रयोद शानुषड्.गकप्रयोजनानि प्रोक्तानि। (1) तेऽसुरा–तेहसुराहेलयो हेलय इति कुर्वन्तः पराबभूवुः। तस्माद् ब्राह्मणेन नम्लेच्छितैव नापभाषितैव म्लेच्छो हवा यदपशब्दः (तेहसुराः) तानि च कानि इति जिज्ञासायां– 1. तेहसुराः, 2. दुष्टः शब्दः, 3. यदधीतम्, 4. यस्तप्रयुड्.क्ते, 5. अविद्वांसः, 6. विभक्तिं कुर्वन्ति, 7. यो वाइमाम्, 8. चत्वारि, 9. उतत्वा, 10. सक्तमिव, 11. सारस्वती, 12. दशम्यां पुत्रस्य, 13. सुदेवोऽसिवरूणः।

1. तेऽसुराः हेलयोहेलयः इति कुर्वन्तः पराबभुवुः।
2. दुष्टः शब्दः स्वरतो वर्णतोवा मिथ्याप्रयुक्तो न तमर्थमाह। सः वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रु स्वरतोऽपराधात्।।

दुष्टः शब्दः इति अत्रायं निष्कर्षो यत् स्वरतः=उदात्तादिवर्णधर्मतः, वर्णतः=आकाशाद्यक्षराद्, मिथ्याप्रयुक्तः=अन्यथोच्चारितः, अर्थात् यदर्थबोधनाय प्रयुक्तः शब्द अर्थान्तरं स्वरवर्णदोषात् प्रतिपादयन्नाभिममित्यर्थः। एवं सति वागेव हिंसकत्वाद् वज्रो भूत्वा यजमानं प्रयोक्तारं हिनस्ति विनाशयति। यथा इन्द्रशत्रुश्शब्दस्वरदोषाद्यजमानं हिंसितवान्। एवं श्रूयते यत् त्वष्ट्रपुत्रं विश्वरूपम् इन्द्रो हुतवान् तदनन्तरं त्वष्टा इन्द्रं हन्तुं यागं कृतवान्। तत्र (यागे) इन्द्रश्शत्रुर्विवध र्स्व, इति मन्त्र ऋत्विजा ऊहितः।

तत्र इन्द्रस्य शमयिता=शातयिता वा भव इति क्रियाशब्दोऽत्र शत्रुशब्दे समाश्रितो जातु रूदिशब्द तदाश्रयणे हि बहुब्रीहितत्पुरूषयोरर्थयोरभेदः। तत्र इन्द्रभिन्नत्वे सिद्धे सति इन्द्रस्य शत्रुः शातयिता मारको वा भव इति इत्यर्थे प्रतिपाद्ये अन्तोदात्ते प्रयोक्तव्ये आद्युदात्त ऋत्विजा प्रयुक्तः इति तेन इन्द्रशत्रुः (मादकः) यस्य स इति विपरीतार्थकः बहुब्रीहिसमासो जातः तेन इन्द्र एव वृत्रस्य शमयिता शातयिता वा सम्पन्नः। तस्माद्द1ष्टान् शब्दान् मा प्रयुज्यादित्यध्येयं व्याकरणमिति।

दुष्टश्शब्दस्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह स वाग्वज्रे यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् इति।

**3. यदधीतम्–**

यदधीतमविज्ञाते निगदेनैव शब्द्यते। अनाग्नाविव शुष्केन्धो न तज्जवलति कर्हिचित्।।1।।

अत्रायं निष्कर्षो यदविज्ञातं=अविदितः सुवादिसरेकारहीनत्वात् अर्थज्ञानरहितत्वाद्वा, निगदेनैव=पाठमात्रेणैव शब्द्यते तत् कर्हिचिदपि न ज्वलति=न सफलं भवति। यथा अनग्नौ=अग्निरहिते भस्मनि शुष्कैन्धः=नीरसकाष्ठं न ज्वलति निरर्थकं भवति निष्फलञ्च भवति तद्वदित्यर्थः। अर्थश्च व्याकरणमन्तरा न ज्ञातुं शक्यते। तस्मादनर्थकं माधिगीमहीत्यध्येयं व्याकरणम्।

**4. यस्तु प्रयुड्.क्ते–**

यस्तु प्रयुड्.क्ते कुशलोविशेषे शब्दान्यथावद् व्यवहारकाले। सोऽनन्तमाप्नोति जयं परत्र वागयोगविद् दूष्यति चापशब्दैः।।

अत्रायं निष्कर्षो यद् यस्तु प्रयुड्.क्ते कुशलो विशेषे शब्दान्यथावद् व्यवहारकाले। सोऽनन्तमाप्नोति जयं परत्र वाग्योगवद् दुष्यति चापशब्दैः। यथार्थशब्दज्ञाने कुशलो मनुष्यः व्यवहारकाले यथा स्थानप्रयत्नं ग्रस्तनिरस्तादिदोषरहितं शब्दान् प्रयुड्.क्ते स वाग्योगविद परत्र परलोके अनन्तं जयं प्राप्नोति लभते तथा च अवाग्योगविद् अपशब्दैः=अशुद्धोच्चारणैः दुष्यति पापीयान् भवति।

**5. अविद्वांसः –**

अविद्वांसप्रतयभिवादे नाम्नो ये न प्लुतिं विदुः। कामं तेषु तु विप्रोस्य स्त्रीष्विवायमहं वदेत्।

प्रत्यविभादे= अभिवादानन्तरप्रयुज्ये वचने हि गुरूणां प्लुतः कार्यः। यस्तु प्लुतं कर्तुं न प्रभवति स स्त्रीवदवक्तव्यः। अयमहमिति न तु अमुकगोत्रोत्पन्नोऽहं यमुकशर्माहं यो गुरोसत्वमहं अभिवादये इत्यादिना सड्.केतेन वाक्येन। अर्थात् स्त्रीषु

नामगोत्रोच्चारणपूर्वकान् अभिवादनं न क्रियते किन्तु ''इयमहं नमामि'' इत्युक्त्वा अभिवादनमात्रं क्रियते तथा अविद्वत्स्वपि व्यवर्तव्यमित्यर्थः। तथा च व्याकरणाध्ययनं विना नाम्नः प्लुतादिविज्ञानं भवितुन्नार्हति तदभावे च जनः अविद्वान् भूत्वा स्त्रीवदसम्पद्यते। तस्मात् स्त्रीवन्माभूम इत्यध्येयं व्याकरणम्।

**6. विभक्तिं कुर्वन्ति–**

याज्ञिकाः पठन्ति–प्रयाजा सविभक्तिका कार्याः इति।

**7. यो वा इमाम्–**

यो वा इमाम् पदशस्वरसोऽक्षशोवाचं विदधति सआर्त्विजिनो भवति। ऋत्विजिनमहतीति= आर्त्विजिनः अर्थात् यो वै निश्चयेन इमां सन्निहितमपरोक्षां वाचं वेदरूपां वाणिं पदं पदं स्वं स्वरं अक्षरमक्षरं विद्धाति संस्करोति स आर्त्विजिनो भवति। यजमान ऋत्विककर्मा हि भवतीति विज्ञेयम्। पदस्वराक्षरविज्ञानञ्च व्याकरणादेव भवितुमर्हति तसमादार्त्विजिनाः स्याम् इत्यध्येयं व्याकरणम्। विशेषतोऽत्र विदधाति=करोति उच्चारयति इत्यत्र क्रिया सामान्यात् क्रियाविशेषः विवक्षितोऽस्ति वाजसनेयप्रातिश्शाख्येऽपि लिखितं यत् ''वर्णशोऽक्षरशोक्षानात विभक्तिपदश्शोऽपि च'' इति।

**8. चत्वारि–**

चत्वारि श्रृड्.गाः त्रयोऽस्यपादाः, द्वे शीर्षे सप्तहस्तासोऽस्य।
त्रिधा बद्धो वृषभो रोरवीति महोदेवो मर्त्यामाविवेश।।

महान् देवशब्दमरणधर्माणो मनुष्यास्ताल अविवेश महता देवेन नः साम्यं सायुज्यं स्यादित्येध्येयं व्याकरणम्। तदुक्तं भर्तृहरिणापि–अपिप्रयुक्तु–रात्मानं शब्दमन्त्रवधितम्। प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते। पूर्वोक्तमेवार्थं मन्त्रान्तरोऽपि विशदयति चत्वारि वाक्परिमितापदानि तानि विदुर्ब्राह्मणा ये मनिषिणः गुह्ययां त्रीणि निहिता नेड्.गयन्ति तुरीयं वाचो मनुष्या वदन्ति।

**9. उतत्वः –**

उतत्वः पश्यन्नददर्श वाचमुतत्वः श्रृष्वन् श्रृणोत्येनाम्।
उतो त्वस्मै तन्वं विसस्रे जायेवपत्य उशति सुवासाः।।

उतत्व अपि खल्वेकः पश्यन्नपि न पश्यति वाचम् अपि खल्वेकः श्रृण्वन्नपि न श्रृणोत्येनामिति अविद्वांसमाहाधर्म। उतो त्वस्मै तन्वं विसन्ने तनुं विवृणुते। जायेव पत्य उशती सुवासाः। तद्यथा जायापत्येकामयमाना सुवासा स्वमात्मानं विवृणते। एवं वागवागविदे स्वात्मानं विवृणुते। वाड.लो विवृणुयादात्मानमित्यध्येयं व्याकरणम्।

**10. सक्तमिव–**

''सक्तुमिव तितऊना पुनन्तो यत्र धीरा मनसा वाचमक्रत्।
अत्र सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधिवाचि।।

सक्तुः सचतेद्धुर्धावो भवति। कसतेर्वा विपरीताद् विकसितो भवति। तितउपरिपवनं भवति। तववद्धा तुन्नवद्धा।

धीराध्यानवन्तःमनसा पज्ञानेन। वाचमक्रम वाचमकृषत। अत्र सखायः सन्त सख्यानि जानते। क्व य एष् दुर्गमो मार्गं एकगम्यो वाग्विषयः। के पुत्रस्ते। वैयाकरणः कुतः एतत्। भद्रैषा लक्ष्मीर्निहितां अधिवाचि। एषां वाचि भद्रालक्ष्मीनिहिता भवति। लक्ष्मी लक्ष–णात् भासनात् परिबृढा भवति। (सक्तमिव)

**११. सारस्वतीं–**

याज्ञिकाः पठन्ति, आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीया। सारस्वतीं मिष्ठिर् निर्वपेत। प्रायश्चिततीयां मा भूमा भूमेत्येध्येयं व्याकरणम्। सारस्वतीम् निर्वपेत।

**१२. दशम्यां पुत्रस्य–**

याज्ञिकाः पठन्ति– दशम्युतरकालं पुत्रस्य जातस्य नामकरणं विदध्यात्
**''घोषवदाद्यन्तर अन्तःस्थवृद्धं त्रिपुरूषानकमनरि प्रतिष्ठितम् भवति''**तद्धि प्रतिष्ठिततमं भवति। द्व्यक्षरं चतुरक्षरं वा नाम कृतं कुर्यान्न तद्धितम् इति। न चान्तरेण व्याकरणं कृदन्तमकृतस्तद्धिता वा शक्या विज्ञातुं दशम्यां पुत्रस्य।

**१३. सुदेवोऽसि–**

''सुदेवोऽसि वरूण यस्य ते सप्तसिन्धवः। अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव। (सुदेवो असि) वरूण सत्यमेवोऽसि'' यस्यते सप्तसिन्धः सप्तविभक्तयः अनुक्षरन्ति काकुदम्। काकुदे=तालु काकुर्जिह्वा, सास्मिन्न्यते इति काकुदम्। सूर्म्य सुषिरामिव। तद्यथा–शोभना मूर्ति सुषिरामिग्निरन्तः प्रविश्य दहति एवं ते सप्तसिन्धव सप्तविभक्तयस्ताल्वनुक्षरन्ति। तेनासि सत्यदेव। सत्ये देवाः स्वामेत्यध्येयं व्याकरणमिति दिक्।

**''इति शम्''**

*****